# श्रीमद्भगवद्गीता - तृतीयोऽध्यायः

## कर्म योगः

**अर्जुन उवाच**

ज्यायसी चेत्कर्मणस्ते मता बुद्धि र्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥1॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽह माप्नुयाम् ॥2॥

**श्री भगवानुवाच**

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥3॥

न कर्मणा मनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसना देव सिद्धिं समधिगच्छति ॥4॥

न हि कश्चित् क्षणमपि जातु तिष्ठत्य कर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजै र्गुणैः ॥5॥

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥6॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगम् असक्तः स विशिष्यते ॥7॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीर यात्राऽपि च ते न प्रसिद्ध्ये दकर्मणः ॥8॥

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्त सङ्गः समाचर ॥9॥

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वं एष वोऽस्त्विष्ट कामधुक् ॥10॥

देवान्भावयताऽनेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥11॥

इष्टान्भोगान्हि वो देवाः दास्यन्ते यज्ञ भाविताः ।
तैर्दत्तान प्रदायैभ्यः यो भुङ्क्ते स्तेन एव सः ॥12॥

यज्ञ शिष्टाशिनः सन्तः मुच्यन्ते सर्व किल्बिषैः ।
भुञ्जते ते त्वघं पापाः ये पचन्त्यात्म कारणात् ॥13॥

अन्नाद् भवन्ति भूतानि पर्जन्यादन्न सम्भवः ।
यज्ञाद् भवति पर्जन्यः यज्ञः कर्म समुद्भवः ॥14॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षर समुद्भवम् ।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥15॥

एवं प्रवर्तितं चक्रं नानुवर्तय तीह यः ।
अघायु रिन्द्रियारामः मोघं पार्थ स जीवति ॥16॥

यस्त्वात्म रतिरेव स्यात् आत्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते ॥17॥

नैव तस्य कृतेनार्थः नाकृते नेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थ व्यपाश्रयः ॥18॥

तस्मा दसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥19॥

कर्मणैव हि संसिद्धिं आस्थिता जनकादयः ।
लोक सङ्ग्रह मेवापि सम्पश्यन्कर्तु मर्हसि ॥20॥

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्त दनुवर्तते ॥21॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्त मवाप्तव्यं वर्त एव च कर्मणि ॥22॥

यदि ह्यहं न वर्तेय जातु कर्मण्य तन्द्रितः ।
मम वर्त्मानु वर्तन्ते मनुष्याः पार्थ सर्वशः ॥23॥

उत्सीदेयुरिमे लोकाः न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्याम् उपहन्यामिमाः प्रजाः ॥24॥

सक्ताः कर्मण्य विद्वांसः यथा कुर्वन्ति भारत ।
कुर्याद्विद्वां स्तथाऽसक्तः चिकीर्षु र्लोक सङ्ग्रहम् ॥25॥

न बुद्धिभेदं जनयेत् अज्ञानां कर्म सङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥26॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कार विमूढात्मा कर्ताऽहमिति मन्यते ॥27॥

तत्त्ववित्तु महाबाहो गुणकर्म विभागयोः ।
गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते ॥28॥

प्रकृतेर्गुण सम्मूढाः सज्जन्ते गुण कर्मसु ।
तानकृत्स्न विदो मन्दान् कृत्स्नविन्न विचालयेत् ॥29॥

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्म चेतसा ।
निराशी र्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥30॥

ये मे मतमिदं नित्यम् अनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तः मुच्यन्ते तेऽपि कर्मभिः ॥31॥

ये त्वेतदभ्यसूयन्तः नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञान विमूढांस्तान् विद्धि नष्टा नचेतसः ॥32॥

सदृशं चेष्टते स्वस्याः प्रकृते र्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥33॥

इन्द्रिय स्येन्द्रिय स्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥34॥

श्रेयान्स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥35॥

**अर्जुन उवाच**

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥36॥

**श्री भगवानुवाच**

काम एष क्रोध एषः रजोगुण समुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥37॥

धूमेनाव्रियते वह्निः यथाऽऽदर्शो मलेन च ।
यथोल्बेनावृतो गर्भः तथा तेनेद मावृतम् ॥38॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्य वैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥39॥

इन्द्रियाणि मनो बुद्धिः अस्याधिष्ठान मुच्यते ।
एतैर्विमोहयत्येषः ज्ञानमावृत्य देहिनम् ॥40॥

तस्मात्त्व मिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञान विज्ञान नाशनम् ॥41॥

इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मनः ।
मनसस्तु पराबुद्धिः यो बुद्धेः परतस्तु सः ॥42॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मान मात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥43॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुन संवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥